International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(5): 19-22
© 2023 IJSR
www.anantaajournal.com
Received: 20-06-2023
Accepted: 23-07-2023

डॉ. रा. सुब्रह्मण्य भिडे
सहायाचार्यः, श्री वेङ्कटेश्वर वेद विश्वविद्यालयः, तिरुपतिः, आंध्र प्रदेश, भारत

Corresponding Author:
डॉ. रा. सुब्रह्मण्य भिडे
सहायाचार्यः, श्री वेङ्कटेश्वर वेद विश्वविद्यालयः, तिरुपतिः, आंध्र प्रदेश, भारत

# कृष्णयजुर्वेदीय-तैत्तिरीयशाखायां राष्ट्रभावनांशाः

**डॉ. रा. सुब्रह्मण्य भिडे**

**सारांश**

पूर्वम् इदं भारतवर्षं दुःशीलैः, क्रूरिभिः वैदिकधर्मेतर-मतानुयायिभिः राजापसदैः अधर्मेण मार्गेण, अधार्मिकयुद्धेन च आक्रान्तं जातम्' 'तेषां अधार्मिकपरिपालनेन अस्माकं भारतीय-सनातन-ज्ञानस्रोतः प्रजाभ्यः बहुदूरं गत'मित्यतः अस्माकं देशस्य जनानां राष्ट्रिया भावना नास्ति वा ? अथ वा विदेशस्थजनान् संलक्ष्य, इयं राष्ट्रिया भावना उत्पन्ना वा ? अथ वा इयं राष्ट्रिया भावना अस्माकं जनानां नास्त्येव वा ? अस्ति चेत् अस्माकं भारतीय-सनातन-वैदिकसंस्कृतेः मूलाधारभूतेषु वेदेषु राष्ट्रियभावनाविषये के के विषयाः परामृष्टाः? इत्येवं नैकेषां विषयाणां विमर्शः अस्मिन् शोधलेखे क्रियते।

**कूटशब्द :** राष्ट्रिया भावना, आर्षग्रन्थाः, मूलप्रमाणं वेदाः, वाजपेययागप्रकरणम् , अश्वमेधयागप्रकरणम्

## प्रस्तावना

अस्माकं भारतीय-सनातन-वैदिकसंस्कृतेः अनुयायिनः वैदिकधर्मश्रद्धालवश्च ये सन्ति तेषां राष्ट्रिया भावना अवश्यं जागरिता भवत्येव। यतः राष्ट्रभावनां विरहय्य अस्माकं संस्कृतिर्नास्ति। किन्तु दुःशीलैः, क्रूरिभिः वैदिकधर्मेतर-मतानुयायिभिः राजापसदैः अधर्मेण मार्गेण, अधार्मिकयुद्धेन च इदं भारतवर्षं पूर्वम् आक्रान्तं जातम्।

अस्माकं आर्षग्रन्थेषु नाम ऋषिप्रणीतग्रन्थेषु रामायण-महाभारत-पुराणादिषु ग्रन्थेषु तत्र तत्र सन्दर्भे राष्ट्रभावना उद्दीपिता वर्तते । तत्र मनुस्मृत्यादिषु स्मृतिषु महाभारतादि-इतिहासग्रन्थेषु च राज्ञां कृते उपदेशः, राष्ट्रव्यवस्था, राष्ट्रनिर्माणे स्वाम्यमात्यादि-सप्ताङ्गकल्पनम्, दण्डव्यवस्था इत्येवं बहुषु विषयेषु महता विस्तरेण उपदिष्टं वर्तते।

एतेषाम् आर्षग्रन्थाणां मूलाधारेषु वेदेषु, तत्र च कृष्णयजुर्वेदीय-तैत्तिरीयशाखायां राष्ट्रिया भावना कथं भवतीति पर्यालोच्यमाने 'राष्ट्रम्' इति पदेनैव बहुत्र राष्ट्रकल्पनाः लक्ष्यन्ते।

तत्र प्रथमं - सर्वेषु वैदिककर्मसु, संस्करकर्मसु च देवताभ्यः हविःप्रदानार्थं अल्पो होमः क्रियते। तस्य होमस्य याज्ञिकव्यवहारे 'अग्निमुखम्' इति नाम भवति। तत्र सर्वदा सर्वत्र प्रधानाहुत्यनन्तरं जयादिहोमं कर्तुमुपदिश्यते । जयादयः, जय-अभ्यातान-राष्ट्रभृन्मन्त्राः इत्यर्थः। एतैः जयादिमन्त्रैः देशे सर्वत्र प्रत्यहं प्रत्येकं संस्कारकर्मसु नवग्रहादिमखेषु विविधशान्तिहोमेषु च, प्रायः सर्वत्र जयादिहोमो भवति । अत्र जयहोममन्त्राः 'चित्तं च स्वाहा' इत्यादयः त्रयोदश मन्त्राः ।'एतेषां मन्त्राणां होमेन देवाः जयं प्राप्नुवन्' इत्यतः एतेषां मन्त्राणां 'जय' इति संज्ञा। श्रूयते च – देवासुराः संय्यत्ता आसन् .... स इन्द्रः प्रजापतिमुपाधावत् , तस्मा एतान् जयान् प्रायच्छत् , तानजुहोत् , ततो वै देवा असुरानजयन् , यदजयन् तज्जयानां जयत्वम्, स्पर्धमानेनैते होतव्याः, जयत्येव तां पृतनाम् (तै.सं.३.४.४) इति ।

अत्र शत्रुपृतनाजयार्थं जयमन्त्राणां होमः कर्तव्यः इत्युक्तम् । पृतना कस्य भवति ? राष्ट्रस्य भवति । एतेन राष्ट्रस्य भावना परोक्षेण सूचिता भवति। जयहोमानन्तरं अभ्यातानहोमः भवति । अत्र प्रसङ्गात् जय-राष्ट्रभृन्मत्राणां अन्तःर्हितत्वात् अभ्यातानमन्त्रा अपि विचार्यन्ते । 'अग्निर्भूतानामधिपतिः' इत्यादयः सानुषङ्गाः अष्टादश (१८) मन्त्राः अभ्यातानमन्त्राः भवन्ति। अभ्यातानाशब्दस्य व्युत्पत्तिरेवं वर्तते यत् - अभ्यातन्यते अभिमुख्येन आनीयते कर्मसमृद्धिः एभिरिति अभ्यातानाः ।

अभ्यातानविवरणवाक्येष्वपि एवं श्रूयते – देवा वै यद्यज्ञेऽकुर्वत, तदसुरा अकुर्वत, ते देवा एतानभ्यातानान् अपश्यन् , तानभ्यातन्वत, यद्देवानां कर्मासीदार्ध्यत, तद्यदसुराणां न तदार्ध्यत, येन कर्मणेर्त्सेत्तत्र होतव्याः, ऋध्नोत्येव तेन कर्मणा (तै.सं.३.४.५)। इति। अर्थात् – कर्मसमृद्धिहेतून् अभ्यातानाख्यान् मन्त्रान् देवाः अजुहवुः। तेन देवानां कर्म समृद्धं जातम् । एतद्धोमाभावात् असुराणां कर्म असमृद्धमभवत् इति।

अभ्यातानहोमानन्तरं राष्ट्रभृन्मन्त्रहोमा भवन्ति। 'राष्ट्रं भ्रियते (स्वीक्रियते) एभि' रिति, 'राष्ट्रं भ्रातृव्यस्य भ्रियते, आत्मना धार्यते एभि'रिति, 'भ्रातृव्यस्य राष्ट्रं ह्रियते एभि'रिति 'राष्ट्रभृतः' इत्येवं विवरणं भाष्येषु दृश्यते । 'ऋताषाड्ऋतधामाग्निः' इत्यादयः सानुषङ्गाः द्वाविंशति (२२) मन्त्राः राष्ट्रभृन्मन्त्राः। एतेषां होमेन 'शत्रुराष्ट्रं पुनः स्वहस्तगतं भवती'ति राष्ट्रभृन्मन्त्रविवरणवाक्यैरवगतं भवति । यथा - यद्राष्ट्रभृद्भी राष्ट्रमाददत तद्राष्ट्रभृता९ राष्ट्रभृत्त्वम् इति । यो भ्रातृव्यवान् स्यात् स एतान् जुहुयात्, अभ्यातानैरेव भ्रातृव्यानभ्यातनुते, जयैर्जयति, राष्ट्रभृद्भी राष्ट्रमादत्ते । (तै.सं.३.४.६) इति ।

एतैः राष्ट्रभृन्मन्त्रैः राष्ट्रकामः, आत्मनः श्रेयस्कामः, ग्रामकामः, राष्ट्रात् भ्रष्टः, प्रक्रान्तयुद्धः उन्मादपरिहारार्थी, इत्येवं बह्वीनां कामनानां कृते जुहुयादिति विधिर्वर्तते । एतेन 'राष्ट्रभृन्मन्त्राः अत्यन्तं असाधारणाः' इति वक्तुं शक्यते । तथा राष्ट्रकल्पना असाधारणी वेदोक्ता चेति ज्ञायते।

एवञ्च वाजपेयप्रकरणे वाजप्रसवीयहोममन्त्राः श्रूयन्ते। तत्र प्रथममन्त्रे एव राष्ट्रशब्दः श्रूयते। यथा – वयं राष्ट्रे जाग्रियाम पुरोहिताः (तै.सं.१.७.१०) इति । मन्त्रादिस्तु – वाजस्येमं प्रसवः सुषुवे अग्रे इति । मन्त्रार्थस्तु – अन्नस्योत्पादकः परमेश्वरः ओषधीषु अप्सु च सारभूतं वल्लीरूपं सोमं राजानम् इमं दीप्तिमन्तं पदार्थं, सृष्ट्यादौ उत्पादयामास । ताः ओषधयः आपश्च अस्मदर्थं माधुर्योपेता भवन्तु । वयमपि तद्वत्तया अस्मिन् राष्ट्रे पुरोहिताः यागानुष्ठानादौ पुरोगामिनः धर्मकार्येषु अग्रतःकृताः प्रधानभूताः भूत्वा, जाग्रियाम जागरुका भूयास्म । प्रबुध्येमहि अप्रमत्ता भवेम इति । अत्र 'राष्ट्रे वयं जागरूका भवेमे'ति यद्यपि अस्ति तथापि इदं राष्ट्रं वयं धर्मशीला भूत्वा जागरयेम इत्यंशोऽपि सूचितो भवति ।

अश्वमेधप्रकरणे च बहुत्र राष्ट्रशब्दः प्रयुक्तो वर्तते – तत्र युञ्जन्ति ब्रध्नमित्याह । (तै. ब्रा. ३.९.४) इत्यस्मिन्ननुवाके, हिरण्ययाः काचा भवन्ति । ज्योतिर्वै हिरण्यम् । राष्ट्रमश्वमेधः। ज्योतिश्चैवास्मै राष्ट्रञ्च समीची दधाति । (तै.ब्रा.३.९.४) इति श्रूयते । अत्र अश्वस्य रथयोजनालङ्कारादिविधानक्रमे एवमुच्यते – मणयः सुवर्णेन निर्मातव्याः। हिरण्यस्य ज्योतिष्ट्वात् अश्वमेधस्य राष्ट्रप्रदत्वेन ज्योतिः राष्ट्रं च आनुकूल्यं सम्पादयति इत्यभिप्रायः। अनेन राष्ट्रं सर्वदा समृद्धं भवेदिति सूचितं भवति।

ततश्च, अप वा एतस्माच्छ्री राष्ट्रं क्रामति । (तै.ब्रा.३.९.७) इत्यस्मिन्ननुवाके एवमुच्यते - अश्वमेधयागकरणेन बहुधनव्ययो

भवति । अतः धनराहित्येन राष्ट्रस्यापि अपगमो भवति। इदानीं वयं रोगादिबहुकारणैः बहुराष्ट्राणां धनकारणात् राष्ट्रस्य अपगमं पश्यन्त एव स्मः। अत्र ऊर्ध्वामेनामुच्छ्रयतात् इति (तै.सं.७.४.१९) मन्त्रोच्चारणेन 'श्रियाः प्राप्तिः, तद्वारा राष्ट्रस्यापि पुनः प्राप्तिः भवती'ति ज्ञायते। अत्र भाष्यकाराः कथयन्ति यत् - अश्वमेधस्य श्रीरूपत्वात् राष्ट्ररूपत्वाच्च (अश्वावयवस्य) उच्छ्रितत्वप्रार्थनया 'श्रियं राष्ट्रं च ऊर्ध्वं यथा भवति तथा उन्नतं करोति' (तै.ब्रा.३.९.७) इति । अनेन राष्ट्रे सर्वदापि यथा धनहानिर्न भवति तथा राष्ट्रं रक्षणीयमिति ज्ञायते।

एवमेव वेणुभारं गिराविवेत्याह । राष्ट्रं वै भारः। राष्ट्रमेवास्मै पर्यूहति। (तै.ब्रा.३.९.७) इत्यत्र, वेणुभारं गिराविव (तै.सं.७.४.१९) इति मन्त्रोच्चारणेन "राष्ट्रस्य भारस्थानीयत्वात् राष्ट्रं 'सर्वतः' यथा समाधीयते तथा भवती"ति उच्यते ।'यथा वेणुभारवाही कस्मिंश्चिद्गिरौ वेणून् छित्वा भारं बद्ध्वा स्वशिरसि आरोपयितुं सौकर्यार्थं वृक्षाद्यवष्टम्भेन तं भारं ऊर्ध्वाग्रम् अवस्थाययति तद्वत्' इति । एतेन राष्ट्रं सर्वतः यथा समाहितं भवति तथा प्रयत्नः करणीयः इति सूच्यते ।

अनन्तरं श्रीर्वै राष्ट्रस्य मध्यम् ।(तै.ब्रा.३.९.७) इत्युक्त्या धनादिसमृद्धरूपा श्रीः राष्ट्रस्य मध्यरूपा, नाम केन्द्रस्थानीया भवतीति कारणेन राष्ट्रस्थित्यर्थं सर्वदा श्रियाः आर्जनशीलो राजा भवेदिति राष्ट्रकेन्द्रं श्रीरिति सूच्यते ।

तथा - शीते वाते पुनन्निव (तै.सं.७.४.१९) इति मन्त्रवदनेन 'शीतवातस्य तापनिवारकत्वेन क्षेमरूपत्वात् क्षेमं प्राप्नोती'ति हेतुना राष्ट्रस्य श्यैत्यीकरणे सर्वदा यत्नः कार्यः इति लक्षितं भवति । तत्र श्रुतिः इत्थं विवृणोति – शीते वाते पुनन्निवेत्याह। क्षेमो वै राष्ट्रस्य शीतो वातः। क्षेममेवावरुन्धे । (तै. ब्रा.३.९.७) इति । अत्र वयं Global worming समस्यां यदि लक्षयामः तर्हि राष्ट्रस्य शीतत्वमहत्त्वम् अवगम्यते।

एवञ्च – यद्धरिणी यवमत्ति न पुष्टं पशु मन्यते (तै.सं.७.४.१९) इति मन्त्रस्य व्यारव्यानावसरे – विड्वै हरिणी । राष्ट्रं यवः। विशं चैवास्मै राष्ट्रं च समीची दधाति । (तै.ब्रा.३.९.७) इति हरिणीयवशब्दाभ्यां प्रजाः राष्ट्रं च उभयं सृज्यते । यदा काचित् हरिणी रात्रौ समागत्य, क्षेत्रस्वामी यथा न जानाति तथा क्षेत्रे फलितं यवं भक्षयति, एवं हरिण्या यवे भक्षितेऽपि हरिणीरूपं पशुं पुष्टं, क्षेत्रिकः न जानाति । यस्मादेवं तस्मात् , क्षेत्रस्वामिवत् कृत्स्नभूमिस्वामी राजा, पशुन् न पुष्यति, नाम पशुपुष्टिं स्ववृत्तितया न गणयति । वैश्यस्य वृत्त्यन्तराभावात् पशुपुष्टिं वैश्यः बहुमन्यते । राजा तु प्रभूतधनसमृद्धत्वात् न गणयति ।

अत्र प्रजा हरिणीस्थानीया । अथवा राजस्वामिकायां भूमौ उत्पन्नधान्यभक्षणात् हरिणीसादृश्यम् । राष्ट्रस्य भोग्यत्वात् यवसादृश्यम् । एतेन प्रजायाः राष्ट्रस्य च आनुकूल्यं सम्यक् सम्पादयेदिति सूचितं भवति।

एवञ्च - इयं यका शकुन्तिका (तै.सं.७.४.९) इति मन्त्रोच्चारणेन, विड्वै शकुन्तिका । राष्ट्रमश्वमेधः। विशं चैवास्मै राष्ट्रं च समीची दधाति । (तै.ब्रा.३.९.७) इति श्रुतिविवरणात् प्रजाराष्ट्रयोः राजानुकूल्यं यथा सम्पादयेत् , तथा अमात्यादयः कुर्युरिति सूच्यते।

तथा - विशः नाम वणिजः राष्ट्रं प्रति यथा सर्पेयुः आगच्छेयुः तथा व्यवस्था करणीया इति, आहलमिति सर्पतीत्याह । तस्माद्राष्ट्राय विशः सर्पन्ति । (तै.ब्रा.३.९.७) इति मन्त्रव्याख्यानरूप-ब्राह्मणकथनेन ज्ञायते।

एवमेव - आहतं गभे पसः। (तै.सं.७.४.१९) इति मन्त्रव्याख्याने, विड्वै गभः। राष्ट्रं पसः। राष्ट्रमेव विश्या हन्ति । तस्माद्राष्ट्रं विशं घातुकम् (तै.ब्रा.३.९.७ ) इति विवरणात् , राष्ट्रं प्रजां प्रति गमनशीलं यथा भवेत् तथा राजव्यवस्थया यत्नः करणीयः इति सूचितं भवति ।

तथा च – तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति ।(तै.ब्रा.३.९.१४ ) इति श्रुतिव्याख्यानेन राष्ट्रस्य सर्वतः सम्यक् ग्रहणे ब्रह्मशक्तिः नाम मन्त्रालोचनादिज्ञानं, क्षात्रशक्तिः नाम सैन्यशक्तिः, दण्डशक्तिः, भुजबलपराक्रमः, एतद्वितयस्यापि व्यवस्थीकरणे जागरूको भवेदिति ज्ञायते ।

एवञ्च – अश्वमेधप्रकरणे ब्रह्मवर्चसहोमार्थं प्रयुक्तमन्त्रेषु , आऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायताम् (तै.सं.७.५.)इति मन्त्रस्य व्याख्याने, आऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतामित्याह । राजन्य एव शौर्यं महिमानं दधाति ।

(तै.ब्रा.३.८.१३) इति व्याख्यानेन राष्ट्रे 'शूराणां, युद्धविद्याविशारदानां, शतेन सहस्रेण च शत्रुभिः सह, एकेन सङ्ग्रामं कर्तुं योग्यतायुक्तानां महारथानां, निर्माणार्थं यतेते'ति सूच्यते । एवमत्र शोधप्रबन्धे 'कृष्णयजुर्वेदीय-तैत्तिरीयशाखायां राष्ट्रभावनांशाः' इति विषये केचन अंशाः विमृष्टाः। राष्ट्रं नाम राजा, पुरोहितः, मन्त्री, सेनाधिपतिः, इत्येवं बहूनि राजतन्त्रस्थानानि आहोस्वित् जनतन्त्रस्थानानि भवन्ति । अतः एतानि सर्वाणि तन्त्रस्थानान्यधिकृत्य आर्षवाङ्मये बहुत्र ग्रन्थेषु विस्तरशः विव्रियते । एवञ्च, राष्ट्रकल्पनां विरहय्य, अस्माकं वैदिकसंस्कृतिः कदचिदपि नाऽसीत् , न भवति, न भविष्यति इत्युक्त्वा विरम्यते विस्तरात्।

## सन्दर्भ


1. तैत्तिरीयसंहिता
   Editor : Sripada Damodara Satvalekar
   4th Edition, 1983
   Pub. : Svadhyaya Mandalam
   Paradi, Balasad, Gujarat state
2. तैत्तिरीयसंहिता (भाष्यसहिता)
   Vol. IV, Part II, Year : 2010
   Editor : T N Dharmadhikari
   Pub. : The Director,
   Adarsha Sanskrit Shodha Samstha
   (Vaidika Samshodhana Mandal)
   Pune - 411037
3. तैत्तिरीयब्राह्मणम्
   Pub. : Heritage India Educational Trust
   63, Sanskrit College Street
   Mylapore, Chennai – 600 004, Year : 1986
4. तैत्तिरीयब्राह्मणम् (सायणभाष्यसहितम्)
   Editor : Prof. Pushpendra Kumar
   1st Edition, 1998
   Pub. : Nag Publishers
   11A/U.A. Jawahar Nagar,
   New Delhi – 110 007